# 5.4.1

## $Q_L$M

**The Alumni Association/Chapters (registered and functional) contributes significantly to the development of the institution through financial and non financial means during the last five years.**

**पूर्वच्छात्रसङ्घः (पञ्जीकृतः कार्यं कुर्वन् च) विगतपञ्चवर्षेषु आर्थिकयोगदानेन अन्यैः उपायैश्च संस्थायाः उन्नत्यर्थं सार्थकतया प्रयतमानः विद्यते ।**

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

## पूर्वच्छात्रपरिषद्

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयेन संस्कृतशिक्षणसमुन्नत्यै च समये समये आयोजनं क्रियते। यस्मिन् सम्मेलने पूर्वविद्यार्थिषु शिक्षकादिषु च विविधाः चर्चाः भवन्ति। तथा च समये समये आर्थिकयोगदानद्वारा अपि च भौतिकादिकं अन्ययोगदानद्वारा संघतः साहाय्यं प्राप्यते। यथा कस्मिन् अपि कार्यक्रमे पञ्जीकरणस्य प्रक्रिया, मञ्चव्यवस्था, शोधपत्रादीनां पाठः, विविधप्रतियोगितासु समन्वयकत्वेन कार्यभारग्रहणम् इत्यादि। विश्वविद्यालयस्य उन्नत्यर्थं पूर्वच्छात्रपरिषदियं विद्यार्थिभिः साकं समालोचनं विधाय उत्तममानविकसम्बन्धं निर्माय साहाय्यं करोति। एते पूर्वच्छात्राः तेषानुभवं कौशलं प्रतिपुष्टिं ज्ञानञ्च विनिमय्य छात्राणामुत्तमशैक्षणिकप्रगति-अनुकूलनियमनिर्माणे उद्योगप्राप्तौ च सहायं कुर्वन्ति। शैक्षिकसंस्थासु केचन पूर्वच्छात्राः शैक्षणिकपदे कार्यरताः।

**पूर्वच्छात्रपरिषत्-** विश्वविद्यालयस्यास्य शिक्षिताः छात्राः बहुसंख्याकाः समाजे प्रतिष्ठिताः अभवन् । एतेषां पूर्वच्छात्राणां सह नित्यं सम्पर्कं स्थापयितुं "पूर्वविद्यार्थीपरिषद्" इति सङ्गठनं विश्वविद्यालये सक्रियमस्ति। एतेन न केवलं तेषां मूल्यानां पुनर्जागरणं भवति, अपितु विश्वविद्यालये अनेकसेवापरियोजनासु तेषां सक्रियव्यक्तिगतवित्तीयसहभागितापि भवति।

**विश्वविद्यालयकेन्द्रिताः कार्यक्रमाः**

- स्वच्छभारतमिशन इत्यन्तर्गतं विश्वविद्यालये स्वच्छताभियान-एवं -जागरूकता।
- हरितभारतम्, स्वच्छभारतमित्यस्य सम्बन्धे वृक्षारोपणम् एवं सुन्दरविश्वविद्यालयस्य निर्माणम्।
- विश्वविद्यालये विद्युत्संरक्षणाय, एलईडी बल्बस्थापनं तद्विषये जागरूकताभियानम्।
- विश्वविद्यालये जलसंरक्षणाय, वर्षाजलस्य समुचितोपयोगाय प्रोत्साहनम्।

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

- विश्वविद्यालये लघुमृत्परीक्षणाय प्रयोगशालायाः निर्माणम् उपयोगश्च।
- वृक्षारोपणं, साक्षरता, समग्रस्वच्छता, जलसंरक्षणं, जैविककृषिः, योगः इत्यादिषु समकालीनविषयेषु जागरूकता।

**वैचारिकं प्रबोधनम्-**

- विश्वविद्यालयस्य वैचारिकाधिष्ठानस्य स्थापनम्।
- WhatsApp Facebook इत्यत्र पूर्वच्छात्रैः ग्रुपमाध्यमेन सम्पर्कस्थापनम्।
- सोशलमीडिया इत्यत्र विश्वविद्यालयपक्षस्य दृढतया स्थापनम्।
- समाजे प्रत्येकं जनं प्रति विश्वविद्यालयस्य सम्पर्कः स्यात् इत्यस्य प्रयासः।
- शिक्षायाः स्वायत्ताविषयेषु सङ्गोष्ठीनाम् आयोजनं कृत्वा शिक्षाविद्भिः सह सम्पर्कसाधनम्।

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय
# Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya

देवासमार्ग, उज्जैन,(मध्यप्रदेश) . 456010

Website:- www.mpsvv.ac.in



















महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयेन पूर्वछात्रपरिषद: आयोजनम्

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)





महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य पूर्वछात्रैः सह मा. कुलपतिः आचार्यविजयकुमार सी.जी. महोदय

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय

**Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya**

देवासमार्ग, उज्जैन,(मध्यप्रदेश) . 456010

Website:- www.mpsvv.ac.in

---

## संस्कृत विश्वविद्यालय में पहला पूर्व छात्र सम्मेलन आज

**उज्जैन.** महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय का प्रथम पूर्व छात्र सम्मेलन आज 4 अप्रेल को आयोजित किया जा रहा है। इसकी अध्यक्षता विश्वविद्यालय के कुलपति प्रो. विजय कुमार करेंगे। कुलपति ने विश्वविद्यालय में पदभार ग्रहण करने के साथ ही छात्रों से संपर्क एवं संवाद स्थापित किया। विवि के विभिन्न आयोजनों में सक्रिय भूमिका निभाने वाले पूर्व छात्रों को विधिवत पूर्व छात्र परिषद गठन हेतु प्रेरित किया। इसी क्रम में विश्वविद्यालय की पूर्व छात्र परिषद का विधिवत गठन भी किया जाएगा। कुलपति का कहना है कि छात्र केवल अध्ययन काल तक ही विश्वविद्यालय का अंग नहीं है, अपितु जीवन भर छात्र अपनी संस्था से जुड़ते हुए समाज को प्रेरित करें।

---





## संस्कृतविश्वविद्यालये पूर्वच्छात्र सम्मेलनम्



वर्ताहर: डॉ. दिनेश: चौबे

उज्जयिनीस्थे महर्षिपाणिनिसंस्कृतवैदिक विश्वविद्यालये संस्कृतशिक्षण प्रशिक्षण-ज्ञान-विज्ञानसंवर्धन केन्द्रस्य तत्वावधाने मान्य: कुलपति: आचार्यविजयकुमार-सीजी-वर्यस्य परिकल्पनया संस्कृत-संवर्धनाय शास्त्र-संरक्षणाय च उच्चशिक्षाविभागे कार्यरतानां स्थानीय-संस्कृतविदुषां "संस्कृतसपर्या" इति प्रकोष्ठानन्तर्गते एका संगोष्ठी आयोजिता संगोष्ठीरियं "नवीनशिक्षानीति: संस्कृतसंवर्धनं नवाचार: समस्या-परिहाराश्च" विषयिका आसीत्।

कार्यक्रमे अध्यक्षरूपेण साहित्य-विभाग-प्रमुख:डॉ. तुलसीदासपरोहामहोदय: उक्तवान् यत् 'विद्यालयीछात्राणां संस्कृतभाषां प्रति रुचिं वर्धनाय योजना निर्मातव्या । केन्द्रस्य निदेशक: व्याकरण-विभागप्रमुखश्च डॉ. अखिलेश-कुमारद्विवेदी महोदय: प्रस्तावना स्वागतभाषणं च प्रस्तुतवान् । उज्जयिनीस्थ शासकीयसंस्कृतमहाविद्यालयस्य आचार्या: डॉ. हिम्मतलालशर्मा, डॉ. श्रेयसकोरन्ने, डॉ. यशशर्मा, डॉ. जयकुमारतिलवानी, श्रीविद्यासागरपांडे, श्रीशिवांश-शुक्लादया:, शासकीय: माधवकलावाणिज्य महाविद्यालयत: डॉ. नलिनी तिलकरमहोदया विश्वविद्यालयस्य डॉ. उपेन्द्रभार्गवमहोदय:, डॉ. संकल्पमिश्र-महोदया: विश्व-विद्यालयस्य अन्ये आचार्या: स्वविचारान उपस्थापितवन्त: ।

अस्मिन्नवसरे उज्जयिनीमण्डलस्य महा-विद्यालयस्य विश्वविद्यालयस्य च प्राध्यापका:, समुपस्थिता: आसन् दीपदीपनं मङ्गलाचरणात् परं सङ्गोष्ठ्या शुभारम्भ: जात: ।

कार्यक्रमस्य संयोजनं डॉ. दिनेशचौबेमहोदयेन कृतम् । अस्यां विचारसङ्गोष्ठ्यां पाठ्यक्रमाणां सरलीकरणं, नवीन पाठ्यक्रमाणानां निर्माणं, संस्कृतक्षेत्रे उद्योगावसरा: इत्यादिविषयेषु चर्चा जाता। कल्याणमन्त्रेण सह सभा समाप्ता ।

---

**प्रकाशितांशा:**

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)













REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)
















REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)



**महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य पूर्वच्छात्राणां योगदानम्**

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)